लाक्षाप्रसादः, पुं, ( लाक्षायाः प्रसादो यस्मात् । ) पट्टिकालोध्रः । इति राजनिर्घण्टः ॥

लाक्षाप्रसादनः, पुं, ( लाक्षां प्रसादयतीति । प्र+सद्+णिच्+ल्युः । ) रक्तलोध्रः । तत्पर्य्यायः । क्रमुकः २ पट्टिका ३ पट्टी ४ । इत्यमरः ॥ ( तथास्य पर्य्यायः ।
"द्वितीयः पट्टिकालोध्रः क्रमुकः स्थूलवल्कलः ।
जीर्णपत्रो बृहत्पत्रः पट्टी लाक्षाप्रसादनः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

लाक्षावृक्षः, पुं, ( लक्षोत्पादको वृक्षः । ) कोशाम्रः । इति राजनिर्घण्टः ॥ पलाशवृक्षः । इति हारावली ॥

लाख, ऋ शोषालमर्थयोः । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-अक०-सेट् । ) ऋ, अललाखत् । इति दुर्गादासः ॥


लाघ, ऋ ङ शक्तौ । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-अक०-सेट् । ) ऋ, अललाघत् । ङ, लाघते । शक्तिः सामर्थ्यम् । इति दुर्गादासः ॥

लाघवं, क्ली, ( लघोर्भावः कर्म्म वा । लघु+"इगन्ताच्च लघुपूर्व्वात् ।" ५ । १ । १३१ । इति अण् । ) आरोग्यम् । इति राजनिर्घण्टः ॥ लघुत्वम् । लघोर्भाव इत्यर्थे ष्णप्रत्ययेन निष्पन्नम् ॥ ( शीघ्रत्वम् । यथा, महाभारते ।५।१८३।७।
"तासां रूपं भारत नोत शक्यं
तेजस्वित्वात् लाघवाच्चैव वक्तुम् ॥"
अल्पत्वम् । यथा, मार्कण्डेये । ४१ । १७ ।
"अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवम् ।
नित्यस्वाध्याय इत्येते नियमाः पञ्च कीर्त्तिताः ॥"
क्षेयम् । यथा, कुमारे । २ । २३ ।
"यमोऽपि विलिखन् भूमिं दण्डेनास्तमितत्विषा ।
कुरुतेऽस्मिन्नमोघेऽपि निर्व्वाणालातलाघवम् ॥")

लाङ्गलं, क्ली, ( लङ्गतीति । लगि गतौ+बाहुलकात् कलच् । वृद्धिश्च धातोः । इति उणादिवृत्तौ उज्ज्वलदत्तः । १ । १०८ । ) स्वनामख्यात भूमिकर्षणयन्त्रम् । तत्पर्य्यायः । हलम् २ गोदारणम् ३ सीरः ४ । इत्यमरः ॥ हलः ५ हालम् ६ हालः ७ शीरः ८ । इति भरतः ॥ ( यथा, वाजसनेयसंहितायाम् । १२ । ७१ ।
"लाङ्गलं पवीरवत्सुशेवंसोमपित्सरु ॥" )
लिङ्गः । इति त्रिकाण्डशेषः ॥ पुष्पविशेषः । तालवृक्षः । गृहदारु । इति मेदिनी । ले,१२८॥

लाङ्गलग्रहः, पुं, कृषकः । लाङ्गलं गृह्णाति य इत्यर्थे अनुप्रत्ययेन निष्पन्नः ॥ ("शक्तिलाङ्गलाङ्कुशयष्टितोमरघटघटीधनुःषु ग्रहेरुपसंख्यानम् ।" ३ । २ । ९ । इत्यस्य वार्त्तिकोक्त्या अच् ॥)

लाङ्गलचक्रं, क्ली, ( लाङ्गलाकारं चक्रम् । ) कृषिकर्म्मणि शुभाशुभगणन हलाकारचक्रविशेषः । यथा । अथ लाङ्गलचक्रं स्वरोदये ।
"लाङ्गलं दण्डिकायुग्मयोक्त्रद्वयसमन्वितम् ।
दण्डकादि लिखेत् भानि दिनेशाक्रान्तभादितः ॥
दण्डिकाहलयुग्मानां द्विदिस्थाने त्रिकं त्रिकम् ।
योक्त्रयोश्च त्रिकञ्चैव मध्ये पञ्चाग्रके द्विकम् ॥
दण्डस्थे च गवां हानिर्युग्मस्थे स्वामिनो भयम् ।
लक्ष्मीर्लाङ्गलयोक्त्रे स्यात् चेत्तारम्भदिनर्क्षके ॥"
इति ज्योतिस्तत्त्वम् ॥



लाङ्गलदण्डः, पुं, ( लाङ्गलस्य दण्डः । ) लाङ्गलमध्यस्थकाष्ठम् । लाङ्गलेर ईश इति भाषा । तत्पर्य्यायः । ईशा २ । इत्यमरः ॥ ईषा ३ । इति शब्दरत्नावली ॥

लाङ्गलपद्धतिः, स्त्री, (लाङ्गलस्य पद्धतिः ।) लाङ्गलरेखा । सिराल इति भाषा । तत्पर्य्यायः । शीता २ । इत्यमरः ॥ सीता ३ । इति शब्दरत्नावली ॥

लाङ्गलिकः, पुं, ( लाङ्गलवत् आकृतिरस्यस्येति । लाङ्गल+ठन् । ) स्थावरविषभेदः । इति हेमचन्द्रः ॥

लाङ्गलिका, स्त्री, (लाङ्गलमिवाकारोऽस्त्यस्या इति । लाङ्गल+ठन् । टाप् । ) लाङ्गलीवृक्षः । इति शब्दरत्नावली ॥ (यथा, गारुडे १९२ अध्याये ।
"रुद्रलाङ्गलिकामूलं छिन्नलस्य तथैव च ।
तेन व्रणमुखं लिप्तं शल्यो निःसरति क्षणात् ॥")

लाङ्गलिकी, स्त्री, ( लाङ्गल+ठन् । ङीष् ।) वृक्षविशेषः । लाङ्गलिया इति विषलाङ्गलिया इति च भाषा । तत्पर्य्यायः । अग्निशिखा २ । इत्यमरः ॥ अग्निज्वाला ३ लाङ्गलिका ४ लाङ्गली ५ । इति शब्दरत्नावली ॥ गैरी ६ दीप्ता ७ हलिनी ८ गर्भघातिनी ९ अग्निजिह्वा १० इन्द्रपुष्पा ११ अग्निमुखी १२ वह्निशिखा १३ । इति रत्नमाला ॥ अस्या गुणाः । कुष्ठदुष्टव्रणनाशित्वम् । इति राजवल्लभः ॥ राजनिर्घण्टोक्तगुणपर्य्यायाः कलिकारीशब्दे द्रष्टव्याः ॥

लाङ्गली, [न्] पुं, ( लाङ्गलमस्त्यस्येति । लाङ्गल+इनिः । ) बलरामः । इति शब्दरत्नावली ॥ ( यथा, हरिवंशे । ३८ । ३८ ।
"स्थापयित्वा विलद्वारि यदून् लाङ्गलिना सह ।
शार्ङ्गधन्वा विलस्यान्तु जाम्बवन्तं ददर्श ह ॥")
नारिकेलः । इत्यमरः ॥ (यथा,—
"नारिकेलो दृढफलो लाङ्गली कूर्च्चशीर्षकः ।
तुङ्गस्कन्धफलश्चैव तृणराजः सदाफलः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
सर्पः । इति शब्दचन्द्रिका ॥ ( लाङ्गलविशिष्टे, त्रि । यथा, रामायणे । २ । ३२ । ३० ।
"तत्रासीत् पिङ्गलो गार्ग्यस्त्रिजटो नाम वै द्विजः ।
क्षतवृत्तिर्वने नित्यं फालकुद्दाललाङ्गली ॥"
तथा, महाभारते । १ । २२२ । ५३ ।
"रामः पाणिग्रहणिकं ददौ पार्थाय लाङ्गली ॥"
स्त्रियां ङीष् । नदीविशेषः । यथा, मार्कण्डेये । ५७ । २९ ।
"लाङ्गलिनी वंशकरा महेन्द्रप्रभवाः स्मृताः ॥")

लाङ्गली, स्त्री, ( लाङ्गलाकारोऽस्त्यस्या इति । लाङ्गल+अच् । ङीष् । ) लाङ्गलाकारपुष्पजलजशाकविशेषः । काँचड़ा इति भाषा । तत्पर्य्यायः । शारदी २ तोयपिप्पली ३ शकुलादनी ४ । इत्यमरः ॥ जलाक्षी ५ जलपिप्पलिः ६ । इति शब्दरत्नावली ॥ पित्तला ७ श्यामादिनी ८ मत्स्यगन्धा ९ । इति जटाधरः ॥ कलिकारी १० । इति राजनिर्घण्टः ॥ (शालपर्णी । तत्पर्य्यायो यथा,—
"स्थिरा विदारिगन्धा च शालपर्ण्यंशुमत्यपि ।
लाङ्गली कलसी चैवक्रोष्टुपुच्छा गुहा मता ॥"
इति गारुडे २०८ अध्यायः ॥ )

लाङ्गुलं, क्ली, पुच्छम् । इत्यमरटीकासारसुन्दरी ॥

लाङ्गूलं, क्ली, ( लङ्ग+"खर्जिपिञ्जादिभ्य ऊरोलचौ ।" उणा० ४ । ९० । इति ऊलच् । बाहुलकात् वृद्धिश्च । ) पशुपश्चाद्दर्शितलम्बमानलोमाग्रावयवविशेषः । ल्याज इति भाषा । तत्पर्य्यायः । पुच्छम् २ लूम ३ वालहस्तः ४ वालधिः ५ । इत्यमरः ॥ लङ्गूलम् ६ लाङ्गुलम् ७ लुलामः ८ अवालः ९ । इति शब्दरत्नावली ॥ लङ्गः १० पिच्छः ११ वालः १२ । इति जटाधरः ॥ ( यथा, कुमारे । १ । १३ ।
"लाङ्गूलविक्षेपविसर्पिशोभै-
रितस्ततश्चन्द्रमरीचिगौरैः ।
यस्यार्थयुक्तं गिरिराजशब्दं
कुर्व्वन्ति वालव्यजनैश्चमर्य्यः ॥" )
गोलाङ्गूलजलमाहात्म्यं यथा,—
"लाङ्गूलेनोद्धृतं तोयं मूर्द्ध्ना गृह्णाति यो नरः ।
सर्व्वतीर्थफलं प्राप्य सर्व्वपापैः प्रमुच्यते ॥"
इति वाराहपुराणम् ॥
शेफः । इति मेदिनी । ले,१२७॥ कुसूलः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

लाङ्गूलिका, स्त्री, ( लाङ्गूलाकृतिरस्त्यस्या इति । लाङ्गूल+ठन् । ) पृश्निपर्णी । इति राजनिर्घण्टः ॥

लाङ्गूली, [न्] पुं, ( प्रशस्तं लाङ्गूलमस्त्यस्येति । लाङ्गूल+इनिः ।) वानरः । इति शब्दचन्द्रिका ॥ ऋषभनामौषधम् । इति राजनिर्घण्टः ॥

लाछ, इ लक्ष्मणि । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) इ, लाञ्छ्यते । लाञ्छति । इति दुर्गादासः ॥

लाज, भर्त्सने । भर्गे । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) लाजति ॥

लाज, इ भर्त्सने । भर्गे । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) द्वौ द्वितीय